# Matribhuta Shatakam

# માતૃભૂતશતકમ્

## Document Information

Text title : Matribhuta Shatakam

File name : mAtRRibhUtashatakam.itx

Category : shiva, shrIdhara-venkaTesha, shataka

Location : doc_shiva

Author : Sri Sridhara Venkatesa

Proofread by : Aruna Narayanan

Description-comments : shrIdharastutimaNimAlA dvitIyo bhAgaH stutimaNimAlA

Latest update : November 20, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 21, 2024

*sanskritdocuments.org*

# માતૃભૂતશતકમ્

શ્રેયાંસિ યં સકૃદનુસ્મરતાં જનાના-
માવિર્ભવન્તિ સુમહાન્ત્યનપાયવન્તિ ।
તં ત્વામનન્યશરણશ્શરણં ભજામિ
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૧॥

આનન્દ સચ્ચિદમલાત્મનિ શઙ્કરે
ત્વય્યન્તર્નિષીદતિ ભવન્તમહો વિહાય ।
ભ્રામ્યામિ મોહવિવશો ભવશોકખિન્નઃ
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૨॥

મદ્દાસસૂનુરયમિત્યનુકમ્પનીયે
મય્યર્ભકે સમધિરોપ્ય વૃથાઽપરાધાન્ ।
યુક્તં કિમેવમધિગન્તુમુદાસિકાં તે
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૩॥

સૌશીલ્યધસ્મરધનસ્મયનષ્ટસંજ્ઞાન્
અજ્ઞો વિષીદતિ યદેષ વૃથાનુધાવન્ ।
તત્પશ્યતસ્તવ દયા ન કથં દયાળો
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૪॥

ભક્તિં ત્વયિ શ્રિતવતાં વદ કઃ પ્રહીણઃ
સા વા તવાહમિતિ કિં ન સકૃત્પ્રપત્તિઃ ।
કિં તદ્ગતામનવિતાસિ કુતોઽસ્મ્યુપેક્ષ્યઃ
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૫॥

દાસસ્તવાહમિતિ યસ્સકૃદપ્યુપૈતિ
રક્ષ્યઃ સ એષ ઇતિ તે વિધૃતવ્રતસ્ય ।
રક્ષોઽહમસ્મ્યથ કિયાનફલો વિલમ્બઃ
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૬॥

આજ્ઞાપયેઃ કથમયે તવ ગર્ભવાસં
    દુઃખાપવર્ગિણિ ગિરીશ સમાશ્રયેયમ્ ।
આસ્તાં સહસ્રમપિ નાનુગુણં ત્વિદં તે
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૭॥

સર્વજ્ઞ શઙ્કરમહેશદયાળુ શબ્દાઃ
    કિં પારિભાષિકતયોપગતા ભવન્તમ્ ।
વિજ્ઞાપિતે વિલપિતેઽપિ કિમિત્યુદાસ્સે
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૮॥

હીનૈસ્સદાધિકૃતિકૈરપિ ધૃષ્યમાણે
    સાવજ્ઞમેવમપદે મયિ દૃશ્યમાને ।
નેદં ક્ષણં ક્ષણમુપેક્ષણમાશ્રયેથાઃ
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૯॥

આલસ્યદુર્વિષયસક્ત્યપલાપનિદ્રા-
    પદ્મામદાધિગદનીચસમાગમાદીન્ ।
વિદ્વાન્ ધુનીહિ ઘટય ત્વયિ મેઽભિલાષં
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૧૦॥

ક્વાસાવનન્યસુલભા ભવદીયતા મે
    ભૂયિષ્ઠનિષ્ઠુર વિપદ્વિષમા ક્વ વૃત્તિઃ ।
એતન્ન કિં તવ યશોભરભઙ્ગભીતં
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૧૧॥

સમ્ફુલ્લચમ્પકલસન્નવમલ્લિકાદિ-
    હૃદ્યોપચાર રુચિરં ભવદર્ચનં મે ।
પાણ્યોસ્તરઙ્ગય નિરન્તરમન્તરાત્મન્
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૧૨॥

દારૈસ્સુતૈશ્શુભતમૈર્દ્રવિણૈઃ પ્રશાન્તૈઃ
    સ્વર્ગાપવર્ગફલસિદ્ધિભિરભ્યુપેતાઃ ।
નન્દન્તિ તે કરુણયા કિમસાધ્યમસ્યાઃ
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૧૩॥

કાલં કિયન્તમઘદન્તુરમન્તરઙ્ગં

ત્વચ્ચિન્તનં તનિતુમક્ષમમીક્ષસે ત્વમ્ ।
ત્વદ્ભક્તયે સ્પૃહયતશ્શિવ મે દયસ્વ
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૧૪॥

વિત્તસ્મયાન્ધ ગૃહકાનન સમ્પ્રચાર
ધૌરેયભાવમવધૂય કદા મદઙ્ઘ્રી ।
સ્તાં ત્વત્પ્રદક્ષિણવિધૌ કરુણાવશાત્તે
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૧૫॥

સ્યાત્ત્વત્પદં વિદળદમ્બુજસૌરભશ્રી-
વિશ્રામસીમભિરુદઞ્ચિતવાક્પ્રપઞ્ચૈઃ ।
સ્તોત્રૈર્વિભો મમ કદા નુ સદાનુબન્ધિ
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૧૬॥

પાદૌ પ્રદક્ષિણવિધૌ ભવદર્ચનેષુ પાણી
સ્તવેષુ ફણિતીરપિ મેઽન્તરાત્મન્ ।
ધ્યાનેમનશ્ચ વિનિયુઙ્ક્ષ્વ દયસ્વમઙ્ક્ષુ
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૧૭॥

મૂઢોઽપટુર્ભવદુપશ્રયણક્રમેષુ
રૂઢોપતાપવિતતિર્વિપદાં કદમ્બૈઃ ।
સીમા તૃષામહમતોઽસ્મિ તવાનુકમ્પ્યઃ
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૧૮॥

અમ્બેયમપ્રતિહતપ્રતિપત્તિશક્તિઃ
સર્વજ્ઞતા ચ ભવતો ભુવને નિરૂઢા ।
ભૂતિશ્ચ વાં નિરવધિસ્તનયસ્તુ સોઽહં
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૧૯॥

પુત્રાદયો ન સુખયન્તિ હિ ભાવભેદાત્
સોપાધિકપ્રણયસમ્ભ્રમિભિઃ કિમેતૈઃ ।
માતા પિતા ચ નિરુપાધિકૃપાનિધિસ્ત્વં
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૨૦॥

ઉદ્ગદ્ગદસ્વનગલં ગલદમ્બુનેત્રં
રોમાઞ્ચકઞ્ચુકિતમઞ્ચિતઘર્મબિન્દુ ।
ત્વન્નામનિ શ્રવણગામિનિ કલ્પયાઙ્ગં

શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૨૧॥

દુર્લભ્યદુર્વિપરિણત્યસુખાનુબન્ધિ-
વિપ્લાવિતેષુ વિષયેષુ વૃથા નિપાત્ય ।
માં ખેદયન્ન કથમુદ્વહસેઽનુકમ્પાં
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૨૨॥

કન્દર્પકોટિશતસુન્દરમિન્દુરેખાચૂડં
દરસ્મિતપરિસ્ફુરદાનનેન્દુમ્ ।
કાન્તં નગેન્દ્રસુતયા કલયે ભવન્તં
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૨૩॥

સૃષ્ટૌ સ્થિતાવપિ લયેઽસ્તિ તવ પ્રભુત્વં
દુઃખે તુ મે દ્વિતયગોચરમેવ દૃશ્યમ્ ।
વ્યઙ્ક્તું તદન્તવિષયં તવ કો વિળમ્બઃ
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૨૪॥

મન્દસ્મિતૈર્દિશિ દિશિ સ્ફુરદિન્દુચૂડૈઃ
ગૌરીસખૈઃ સ્ફટિકગૌર મનોહરાઙ્ગૈઃ ।
ત્વદ્વિગ્રહૈઃ કબલયાવિરતં મનો મે
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૨૫॥

પ્રેમાતિરેકશિશિરાં ત્વદપાઙ્ગધારાં
આનન્દસિન્ધુવલમાનતરઙ્ગરેખામ્ ।
સઞ્ચારયન્મયિ સહામ્બિકયા દયેથાઃ
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૨૬॥

ભ્રૂકિઙ્કરાસ્તવ વિરિઞ્ચપુરન્દરાદ્યાઃ
કસ્ત્વાં વિરોત્સ્યતિ નિરોત્સ્યતિ કિં મમૈનઃ ।
દૈન્યં તતો ન બલવત્ કિમુ દીનબન્ધો
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૨૭॥

અન્વેતિ શઙ્કર ન યં કરુણાઙ્કુરસ્તે
કસ્તં વિલોકયતુ જલ્પતુ કો ધિનોતુ ।
કેયં વિભો વિમુખતા મયિ કિઙ્કરેઽસ્મિન્
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ।
ભાન્તં ભવન્તમનઘં મણિભૂષણૌઘૈઃ

ભાન્ત્યોમયા વિમલવિદ્રુમપાટલાઙ્ગ્યા ।
શ ृઙ્ગારિતાઙ્કુમુપયામિ શશાઙ્કુગૌરં
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૨૯॥

મન્દસ્મિતૈઃ કરુણયા શિશિરૈઃ કટાક્ષૈઃ
પ્રેમાતિરેકમધુરૈરપિ ચાભિલાપૈઃ ।
આનન્દયિષ્યસિ કદા નુ સહામ્બયા ત્વં
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૩૦॥

ગોપાયિતેતિ કુલદૈવતમિત્યજસ્રં
વિસ્રમ્ભતોઽર્પિતભરં ત્વયિ દીનબન્ધો ।
મામીક્ષસે ન કૃપયા યદિ કિં કરોમિ
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૩૧॥

એકં સકૃદ્યદલસો ન પુરાઽભજં ત્વાં
નાનાદુરીશસતતાશ્રયદુર્વિપાકઃ ।
તસ્યૈ ન સોઽયમધુનાઽતિધુનાતિ ચેતઃ
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૩૨॥

એષા સુગન્ધિચિકુરા જનની પિતા ત્વં
કા તે સુતે મયિ વિભો કરુણા પ્રહાણિઃ ।
કિઞ્ચાપિ સા ન ખલુ સાર્દ્રહૃદો જનન્યાઃ
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૩૩॥

ત્વત્સંવિદા તરતિ શોકમિતિ શ્રુતીનાં
ભાવો ભવોન્નતિવિધાયિ તવાભિધાનમ્ ।
શોકાપહં તદહમીશ સમાશ્રયામિ
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૩૪॥

ત્વન્નામકીર્તનમઘાપહમાશયેન
શંસન્ પુરાણનિકરો ન કિલાર્થવાદઃ ।
તત્સંશ્રયોઽહમકૃપાસ્પદમસ્મિ કિં તે
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૩૫॥

કર્માનુરોધિ ફલમિત્યવગમ્યમાને
હ્યેનોહૃતૌ શુભવિધૌ ચ પટીયસસ્તે ।
કર્મેતિ કં પ્રતિ તુ વઞ્ચનચાતુરીયં

શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૩૬॥

ઉત્સઙ્ગસીમનિ સુગન્ધિકચાં નિષણ્ણાં
ઉલ્લાસયન્ કુચતટીનખરાવમર્શૈઃ ।
આભાસિ શઙ્કર નિરન્તરમન્તરઙ્ગે
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૩૭॥

મન્દેતરૈરખિલમાન્તરમન્ધકારં
માણિક્યભૂષણમહોર્મિભિરંશુજાલૈઃ ।
ધુન્વન્વપુસ્તવ વિભાસય માનસે મે
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૩૮॥

અન્તર્વસદ્ભવદુદારપદારવિન્દ
સન્દર્શનાય મમ તત્પ્રતિરોધકં દ્રાક્ ।
અંહઃ કવાટપટલં વિઘટય્ય દેવ
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૩૯॥

ચેતો મમ ત્વદનુચિન્તનબદ્ધતૃષ્ણં
મુષ્ણન્તિ તચ્ચ વિષયા મુહુરેધિતાર્થાઃ ।
વિદ્વાન્ જહિ ત્વયિ વિજૃમ્ભય ભક્તિયોગં
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૪૦॥

દૃક્કૂણિતેન જગતઃ ખલુ સૃષ્ટિરેષા
તેનૈવ તેઽવનલયૌ ભુવને નિરૂઢૌ ।
તેનૈવ સંહર મમાધતતિં દયાળો
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૪૧॥

અઙ્ગં શિરીષમૃદુલં પરુષૈર્મમાશ્મ-
પ્રાયૈર્વચોભિરભિપીડિતમીડનાર્થે ।
યત્તાવકં તમપરાધમિમં સહસ્વ
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૪૨॥

મન્દસ્મિતૈર્ભ્રુકુટિભિર્મધુરૈઃ કટાક્ષૈઃ
વામભ્રુવાં નવનવૈશ્ચ વપુર્વિલાસૈઃ ।
ત્વાં નોઽભજં તરળિતસ્તદિદં સહસ્વ
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૪૩॥

મન્દસ્મિતં મદનસુન્દરમિન્દુચૂડં
    ઉત્સઙ્ગવિસ્ફુરદુમોરસિજસ્પૃશં ત્વામ્ ।
ધ્યાયન્વસાનિ દિવસાનિ નયન્ કદા વા
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૪૪॥

પાટીરસારલહરીં તુહિનાંશુધારાં
    સૌધાકરીમપિ ઝરીમવમન્યમાનઃ ।
ત્વચ્ચિન્તનપ્રભવનિર્વૃતિભિઃ કદા સ્યાં
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૪૫॥

ત્વામસ્મ્યસાવજમુપાસિતુમક્ષમોઽહં
    મોહાન્ધયા બત ધિયા ન યદેતદેનઃ ।
હાર્યા ત્વયૈવ કૃપયા મમ દુર્દશેયં
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૪૬॥

વિત્તાર્જનસ્ય સકલઃ કિમસાવનેહા
    નેહ સ્થિતેઃ ફલમહો ભવતો ધનેહા ।
ઇત્થં દુરીશ્વરગિરાં પદમસ્મિ દીનઃ
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૪૭॥

સાંસારિકાનવધિખેદપરમ્પરાસૂ-
    ન્મજ્જન્નિમજ્જદિવ સીદતિ માનસં મે ।
આશ્વાસયાશુ કૃપયા ન કિમીક્ષસે ત્વં
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૪૮॥

લક્ષ્મીપતિસ્તવ પદાભરણે સ શેતે
    ભિક્ષાટનેન વદ કં પ્રતિવિપ્રલમ્ભઃ ।
જાનામ્યહં ન કિમશેષજગત્પતિં ત્વાં
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૪૯॥

સંસૃત્યુદન્વતિ વિતન્વતિ દુઃખમોહ-
    ગ્રાહૈર્વ્યથામહહ મે દૃઢમજ્જનેન ।
ત્વં ક્રીડસીતિ સદૃશં તવ કિં દયાળો
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૫૦॥

માત્રા સુગન્ધિકચયા ભવતા ચ પિત્રા
    યુક્તઃ પ્રસૂજનકહીન ઇવાવસીદન્ ।

અસ્મીતિ વાં જગદધીશ્વરયોરયુક્તં
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૫૧॥

મૌઢ્યાદપાટવભરાદપિ પૂજનં તે
    નાહં તનોમિ તદહં વ્યથિતો ભવામિ ।
વિઘ્નાનપાસ્ય વિતર ત્વદુપાસનાં મે
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૫૨॥

ત્વદ્વન્દનં નનુ જગત્ત્રયવન્દ્યતાયૈ
    ત્વત્પૂજનં તુ ભુવનત્રયપૂજ્યતાયે ।
પુણ્યોચ્ચયેન તદિદં ભવદીયતા મે
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૫૩॥

અલ્પં મહચ્ચ સકલં ફલમર્પણીયં
    દેવ ત્વયૈવ ખલુ તત્કિમપીહમાનઃ ।
ત્વામાશ્રયામ્યગતિકો વદ કિં તવાગઃ
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૫૪॥

કન્દર્પદર્પહરસુન્દરરૂપધેયે
    મન્દસ્મિતે ભુવનમઙ્ગળનામધેયે ।
ખેદાપહે ભવતિ ખેલય માનસં મે
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૫૫॥

સૂર્યોદયે તિમિરજાલમિવાર્તિજાલં
    ધાવન્ન કિં મમ વિભો યદિ દૃક્પથેસ્યાઃ ।
કિં મે તથા ન દયસેઽનુચિતો વિળમ્બઃ
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૫૬॥

ત્વં ત્રાયસે યદિ નિવારયિતું ક્ષમઃ કો
    લભ્યં કિમસ્તિ તવ મય્યવસીદતીત્થમ્ ।
કિં હીયતે મદવને તવ કિં વિળમ્બૈઃ
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૫૭॥

ચન્દ્રોપલામલભવત્કમનીયમૂર્તિ-
    સમ્પૂજનં સુદૃઢભક્ત્યનઘોપચારૈઃ ।
ઈહે સદા રચયિતું ઘટયાશુ તન્મે
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૫૮॥

સંસારસિન્ધુસમુદિત્વરખેદમોદ-
    વીચીપરિભ્રમપરિશ્રમનોદનં મે ।
આકલ્પય ત્વદભિરાધનહર્ષભૂતં
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૫૯॥

ભક્તિસ્પૃશો ભવતિ તસ્ય ન શર્મ તેન
    ત્રાણવ્રતાશ્રુતિષુ વા ન સકૃત્ પ્રપન્નઃ ।
કસ્માત્ કરોષિ કરુણાં ન મયિ પ્રપન્ને
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૬૦॥

યન્માં ન પાલયસિ તત્ત્વદપાટવાદ્વા
    યદ્વા મદીયદુરિતાદ્બદ નાથ નાદ્યઃ ।
સર્વેશ્વરો નનુ ભવાનત એવ નાન્ત્યઃ
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૬૧॥

વિશ્વાધિનેતરિ વિપન્નજનાવનસ્થે
    નાથે સતિ ત્વયિ ન યન્મમ ખેદભઙ્ગઃ ।
તત્તે યશોહરમતો વિનિવેદયામિ
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૬૨॥

અસ્યોદ્યતસ્સમુપરોદ્ધુમનાત્મનીનં
    સત્યં ભવાનઘફલાર્ત્યનુભાવનાસુ ।
નેશસ્તુ સોઢુમિયદસ્મ્યહમાર્તબન્ધૌ
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૬૩॥

આમજ્જતઃ પ્રતિપદં વિપદમ્બુરાશૌ
    દૃપ્તં મમ શ્વસિતુમપ્યનધીશ્વરસ્ય ।
કિં પશ્યતસ્તવ દયા ન કિયાન્ વિળમ્બઃ
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૬૪॥

સ્વર્ધેનવો ન કતિ નો કતિ કલ્પવૃક્ષાઃ
    ભૂવશ્યતાં ન કતિ યાન્ત્યપરેઽપ્યુદારાઃ ।
ભક્તિસ્પૃશાં ત્વયિ ભજે તમહં ભવન્તં
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૬૫॥

એનામુપપ્લવભરૈર્જટિલામવસ્થાં

પ્રાપ્તં હિ માં પરિહસન્તિ નિતાન્તમન્યે ।
ત્વઞ્ચેન્ન પશ્યસિ દયાર્દ્રદૃશા ગતિઃ કા
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૬૬॥

શ્રીશશ્શરઃ કનકભૂમિશરશ્શરાસો
વાસસ્તુ રૂપ્યશિખરી ધનદસ્સખા તે ।
ત્વામાશ્રિતસ્ય મમ કિન્ન ધુનોષિ દૈન્યં
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૬૭॥

અત્યઙ્કુરાર્ણમુખખેદમહાર્ણવેઽસ્મિન્
મગ્નસ્ય શઙ્કર મમોત્તરણં પ્રકલ્પ્ય ।
ત્વદ્પૂજનં ઘટય સઙ્કલ્પિતાન્તરાયં
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૬૮॥

લોકેઽતિવર્તિતુમલં તવ શાસનં કઃ
પદ્માસનો ભવતુ પદ્મવિલોચનો વા ।
તદ્દુર્લિપિં વિધિકૃતામપિ મે વિલુમ્પ
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૬૯॥

નિસ્સારતામપિ વિદન્વિષયેષ્વમીષુ
નિસ્સીમસક્તિરહમેષુ હિ ગાઢમૂઢઃ ।
રક્ષ્યસ્ત્વયૈવ કરુણાનિધિના પ્રસહ્ય
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૭૦॥

મઞ્ચે તરઙ્ગિતમણિત્વિષિ પુષ્પકલૃપ્તે
મન્દસ્મિતં સહ કદાઽમ્બિકયા ભવન્તમ્ ।
પશ્યામિ પશ્ચિમતનૂપહિતોપબર્હં
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૭૧॥

મય્યાત્મનીનવિમુખે મલિનસ્વભાવે
નિર્વેદસાગરનિમજ્જનવિપ્લવેઽસ્મિન્ ।
કસ્માદ્ ભવસ્યકરુણઃ કરુણાનિધે ત્વં
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૭૨॥

રુદ્રાક્ષભૃદ્ભસિતભૂષણધન્યમૂર્તિઃ
ભાવં વહન્ પ્રમુદિતં ભવદેકતાનમ્ ।
કાલં ક્ષિપેયમિતિ સાધય કામનાં મે

શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૭૩॥

ત્વં ચિદ્ઘનોઽસ્યહમસૌ જડિમૈકસીમા
દુઃખાકરઃ પુનરહં સુખશેવધિસ્ત્વમ્ ।
યુક્તા ન તે સ્થિતિરિયં તવ ગર્ભવાસે
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૭૪॥

ખેદં હરિષ્યસિ કદા શિશિરૈઃ કટાક્ષૈઃ
મોદં કરિષ્યસિ કદા મૃદુભિર્વચોભિઃ ।
ઇત્યુત્સુકોઽસ્મિ કરુણાં કુરુ કિઙ્કરેઽસ્મિન્
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૭૫॥

પાતિ પ્રસહ્ય ન કિમર્ભકમાત્મનીનં
સંયોજકૈર્ગુરુજનઃ સ્મર તં ક્રમં ત્વમ્ ।
ભક્તિં બલાદ્ભવતિ કલ્પય મે દયાળો
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૭૬॥

સોઽહં ન કિઞ્ચિદપિ સાધુ કરોમિ પાપઃ
તુઙ્ગં પદં ત્વભિલષામિ તદપ્યલજ્જઃ ।
ત્વદ્દાતૃતાસદયતાગરિમાવમર્શી
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૭૭॥

શક્તો ન કશ્ચિદપિ શાસનમન્તરા તે
કસ્સેવ્યતાં ત્વદિતરઃ કિમિતઃ ફલં વા ।
સ્વામિન્નુપૈમિ શરણં કરણૈસ્ત્રિભિસ્ત્વાં
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૭૮॥

મૃત્યુઞ્જયોઽસિ કમલાપતિવલ્લભોઽસિ
તન્મૃત્યુદૈન્યવિપદોરપદં ત્વદીયમ્ ।
ત્વામાશ્રિતસ્ય મમ કિં સદૃશી દશેયં
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૭૯॥

કિં જામિતા ન ભવતો મમ દુઃખધારા-
નિર્માતુરસ્મૃતિપદં કિમુપાંશુયાજઃ ।
કસ્માત્પ્રભો કિમપિ શર્મ ન કિં વિધત્સે
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૮૦॥

ક્વાહં ક્વ ચોન્નતપદસ્પૃહયાળુતેય-
માત્મૈવ મામપહસત્યધુના તથાપિ ।
ત્વત્સંશ્રયે સતિ કિમસ્તિ દુરાપમીશ
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૮૧॥

કસ્યાગ્રતઃ પ્રકટયાનિરદાનકાણ્ડે
કં હર્ષયાણિ નુતિભિઃ કમુપાશ્રયાણિ ।
મોઘઃ શ્રમેષુ નિપતેયમતો દયેથાઃ
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૮૨॥

કિં વિદ્યયા કિમુ ધનેન કિમાત્મજૈર્વા
કિં જાયયા કિમિતરૈસ્ત્વયિ ચેન્ન ચેતઃ ।
આનન્દશેવધિમતસ્ત્વયિ દેહિ ભક્તિં
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૮૩॥

દાસોઽસ્મિ દૈન્યવિવશસ્ત્વયિ સર્વલોક-
સામ્રાજ્યસમ્પદમકમ્પિતમશ્નુવાને ।
યત્તન્ન તે સમુચિતં વિમૃશ પ્રસીદ
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૮૪॥

ત્વામાશ્રિતસ્ત્વદિતરાશ્રયદૈન્યભઙ્ગં
અઙ્ગીકરોમિ જગદીશ કથં કથં વા ।
ત્વાં નાયશઃ સ્પૃશતુ તત્ત્યજ મય્યુપેક્ષાં
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૮૫॥

શ્રાન્તં વપુર્દુરધિપાશ્રયધાવનાન્મે
શ્રાન્તં વચો દુરધિપસ્તુતિધોરણીભિઃ ।
ક્રાન્તં મનો દુરધિપાશ્રયચિન્તયૈવ
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૮૬॥

હેમસ્ફુરત્તનુતરઙ્ગિતકાન્તિધારા-
સમ્પ્લાવ્યમાનમણિભૂષણદિવ્યભાસમ્ ।
મન્યે ભવન્તમુમયા મણિહેમપીઠે
શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૮૭॥

સ્વાનન્દબિન્દુલવ સમ્પ્લવમાનસર્વ-
બ્રહ્માણ્ડમણ્ડલમખણ્ડિતવૈભવં ત્વામ્ ।

કસ્તોષયેત્તદપિ તુષ્ય પરિભ્રમૈર્મે
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૮૮॥

કારુણ્યનિર્ભરસુધારસશીતલાભિઃ
    કાલે કદા તવ કટાક્ષપરમ્પરાભિઃ ।
કષ્ટાં દશામુપજહાનિ દૃઢોપગૂઢઃ
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૮૯॥

ભક્તાભિભૂત્યસહનો ભવસિ પ્રતીતો
    ભક્તોઽસ્મ્યહં ત્વદભિધાગ્રહણપ્રસક્તઃ ।
તસ્યાસ્ય તે મયિ કૃપા ન કથં વિષણ્ણે
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૯૦॥

દૃક્કેળયસ્તવ કૃપારસશીકરાઙ્કાઃ
    યાસ્તાસુ તત્તદવનપ્રવણાસુ ચેત્ સ્યાત્ ।
એકા પુનર્મદવનપ્રવણા ક્ષતિઃ કા
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૯૧॥

શ્રેયો રુણદ્ધિ યદિ પાપગણસ્તદા ત્વાં
    ત્વન્નામકીર્તનમઘક્ષપણક્ષમં મે ।
કિન્નાસ્તિ કિં ન દયસે મયિ હન્ત ખિન્ને
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૯૨॥

તાતપ્રસૂતનયદાર સુહૃદ્ભિરેવં
    અર્થોપપત્તિવિરહાદહહાવસીદન્ ।
નેતું ક્ષણં ન નિપુણોઽસ્મિ તતઃ પ્રસીદ
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૯૩॥

શ્રીશૈલરાજસુતયા શિશિરૈઃ કટાક્ષૈઃ
    માં વીક્ષ્યમાણમસકૃન્મધુરસ્મિતેન ।
સમ્ભાવયન્મયિ કદા નુ દયિષ્યસે ત્વં
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૯૪॥

પારે ભવાખ્યજલધેર્ભગવન્ કૃપાકૂ-
    પારે ભવત્યવતરિષ્યતિ મે કદા વા ।
પ્રેમ્ણા તૃણીકૃતપદં સકલં વિતન્વન્
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૯૫॥

નિર્ધૂતદુસ્તિમિરમસ્તસમસ્તતત્તદ્-
    દુર્વાસનં હૃદયમેતદયે વિતન્વન્ ।
અસ્મિન્ ભવિષ્યસિ કદા નુ સુખં નિષણ્ણઃ
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૯૬॥

મદ્વર્ણનૈસ્તવ કદાऽસ્તુ મનઃ પ્રસાદો
    મદ્દૃક્પથેऽસ્તુ ચ કદા તવ દિવ્યમૂર્તિઃ ।
મત્કર્ણગં તવ વચોऽસ્તુ કદેતિ સાશં
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૯૭॥

કાલેऽર્કનન્દન લુલાયકટુસ્વનોદ્ય-
    ત્કર્ણજ્વરાપનયનૈર્ભવદુક્ષજૈર્મે ।
ધ્વાનામૃતૈઃ કિમપિ શર્મ વિનિર્મિમાણઃ
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૯૮॥

યં તે દયા સ્પૃશતિ તન્નયનાન્તદાસાઃ
    બ્રહ્માદયો જગતિ દીનજનાસ્પદા સા ।
દીનાગ્રણીરહમતઃ પુનરુક્તિરેષા
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૯૯॥

અન્યન્ન મેऽભિમતમીશ તદર્પ્યતાં વા
    મા વેપ્સિતં તુ તદિદં ભવતાऽર્પણીયમ્ ।
યત્સર્વદા નિભૃતવૃત્ત્યભિધાનમિત્થં
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૧૦૦॥

હે શઙ્કર સ્મરહર પ્રમથાધિનાથ
    મન્નાથ સામ્બ શશિચૂડ શિવ ત્રિશૂલિન્ ।
શ્રીચિત્સભેશ કરુણાકર ભાલનેત્ર
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૧૦૧॥

એવં સ્તવં પ્રપઠતાં ઉપશ ૃણ્વતાગ્ચા-
    રોગ્યાયુરચ્છશિવભક્તિ ધનર્દ્ધિ વિદ્યાઃ ।
દદ્યાસ્સુતાનપિ યશશ્ચ વિમુક્તિમન્તે
    શ્રીમાતૃભૂત શિવ પાલય માં નમસ્તે ॥ ૧૦૨॥

શ્રીમાતૃભૂત શિવ ચન્દનસાન્દ્રલિપ્તાં

સઙ્ક્લૃપ્તહેમ તિલકાં શ્રિતપુષ્પમાલ્યામ્ ।
અક્ષ્ણાઽમુના તવ તનું પિબતોઽક્ષ્યુદન્યા
સ્યાન્મે યથાશુ ફલિનીશ તથા દયેથાઃ ॥ ૧૦૩॥

મનો મે વિક્રીતં તવ ચરણસેવાં કલયિતું
કૃપામૂલ્યં લબ્ધં સુરભિચિકુરે સમ્પ્રતિ મયા ।
ન જાને તદ્દુષ્ટં નિવસતિ ચ વા ધાવતિ ચ વા
કૃતં ભૂયો ભૂયઃ કરતલયુગાસ્ફાલનમુમે ॥ ૧૦૪॥

ઇતિ શ્રીશ્રીધરવેઙ્કટેશાર્યવિરચિતં માતૃભૂતશતકં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

---

*Matribhuta Shatakam*
pdf was typeset on June 21, 2024

Please send corrections to *sanskrit@cheerful.com*